प्रवेश सं०

विषय: धर्मशास्त्रम्

क्रम सं०

नाम याज्ञवल्क्यस्मृति:

ग्रन्थकार याज्ञवल्क्य:

पत्र सं० १-५०, ६० - ८०

श्लोक सं०

अक्षर सं० (पंक्तौ) ५८

पंक्ति सं० (पृष्ठे)

आकार: ६.४ × ३.३

लिपि: दे.ना.

आधार: का०

वि० विवरणम् अपूर्णा

12190

पी० एस० यू० पी०--७७ एस० सी० ई०--१६४१--५० ०००

द्वि.१२५७१

Indira Gandhi National Centre for the Arts

द्वि १५८१ याज्ञवल्क्यस्मृति । ३७ । ४००

॥स्वस्तिश्रीगणेशायनमः योगीश्वरंयाज्ञवल्क्यंसं
पूज्यमुनयोब्रुवन् वर्णाश्रमेतराणांनोब्रूहिधर्मान
शेषतः १ मिथिलास्थःसयोगीन्द्रःक्षणंध्यात्वा
ब्रवीन्मुनीन् यस्मिन्देशेमृगःकृष्णस्तस्मिन्धर्मा
न्निबोधत २ पुराणन्यायमीमांसाधर्मशास्त्रांग
मिश्रिताःवेदाः स्थानानिविद्यानांधर्मस्यचच
तुर्दश ३ मन्वत्रिविष्णुहारीतयाज्ञवल्क्योश
नोंगिराःयमापस्तंबसंवर्ताः कात्यायनबृह
स्पती ४ पराशरव्यासशंखलिखितादक्षगौ

तमौ शातातपोवसिष्ठश्च धर्मशास्त्रप्रयोजकाः ५ दे
शेकाल उपायेनद्रव्यंश्रद्धासमन्वितंपात्रेप्रदीयतेय
२ स्तु त्तत्सकलंधर्मलक्षणं ६ श्रुतिःस्मृतिःसदाचारः
स्वस्यचप्रियमात्मनःसम्यक्संकल्पजःकामो
धर्ममूलमिदंस्मृतं ७ इज्याचारदमाहिंसादान
स्वाध्यायकर्मणां अयंतुपरमोधर्मोयद्योगेना २
त्मदर्शनं ८ चत्वारोवेदधर्मज्ञाःपर्षत्त्रैविद्यमेव
वासाब्रूतेयंसधर्मस्यादेकोवाध्यात्मवित्तमः ९
इत्युपोद्घातप्रकरणं ब्रह्मक्षत्रियविट्शूद्रावर्णास्त्वा

द्यास्त्रयोद्विजाः निषेकाद्याःश्मशानान्तास्तेषांवै
मन्त्रतःक्रियाः १० गर्भाधानमृतौपुंसःसवनंस्पंद
नात्पुरा षष्ठेष्टमेवासीमंतोमास्येतेजातकर्मच ११
अहन्येकादशेनामचतुर्थेमासिनिष्क्रमः षष्ठेन्न
प्राशनंमासिचूडाकार्यायथाकुलं १२ एवमेनः
शमंयातिबीजगर्भसमुद्भवं तूष्णीमेताःक्रियास्त्री
छन्दे णांविवाहस्तुसमन्त्रकः १३ गर्भाष्टमेब्देब्राह्म
णस्योपनायनं राज्ञामेकादशेसैकेविशामेकेय
थाकुलं १४ उपनीयगुरुःशिष्यंमहाव्याहृतिपू

Indira Gandhi National Centre for the Arts

वेकं वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेत् १५ दि
वासंध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः कुर्या
२ न्मूत्रपुरीषे च रात्रौ चेद्दक्षिणामुखः १६ गृहीत
शिश्नश्चोत्थाय मृद्भिरभ्युद्धृतैर्जलैः गंधलेपक्ष
यकरं शौचं कुर्यादतंद्रितः १७ अंतर्जानु शुचौ
देश उपविष्ट उदङ्मुखः प्राग्वा ब्राह्मेण तीर्थेन २
द्विजो नित्यमुपस्पृशेत् १८ कनिष्ठादेशिन्यं
गुष्ठमूलान्यग्रं करस्य तु प्रजापतिपितृब्रह्मदेव
तीर्थान्यनुक्रमात् १९ त्रिः प्राश्यापो द्विरुन्मृज्य

---

खान्यद्भिः समुपस्पृशेत् अद्भिस्तु प्रकृतिस्थाभिर्हीनाभिः
फेनबुद्बुदैः २० हृत्कंठतालुगाभिस्तु यथासंख्यं द्वि
जातयः शुद्ध्येरन्स्त्री च शूद्रश्च सकृत्स्पृष्टाभिरंततः २१
स्नानमब्दैवतैर्मंत्रैर्मार्जनं प्राणसंयमः सूर्यस्य चाप्यु
पस्थानं गायत्र्याः प्रत्यहं जपः २२ गायत्रीं शिरसा सार्धं
जपेद्व्याहृतिपूर्विकां प्रतिप्रणवसंयुक्तां त्रिरयं प्राण
संयमः २३ प्राणानायम्य संप्रोक्ष्य तृचेनाब्दैवतेन
तु जपन्नासीत सावित्रीं प्रत्यगातारकोदयात् २४
संध्यां प्राक्प्रातरेवं हि तिष्ठेदासूर्यदर्शनात् अग्नि

Indira Gandhi National
Centre for the Arts

कार्यंततः कुर्यात्संध्ययोरुभयोरपि २५ ततोभि
३ वादयेद्‌वृद्धानसावहमितिब्रुवन् गुरुंचैवाप्युपासीत
स्वाध्यायार्थंसमाहितः २६ आहूतश्चाप्यधीयीत
लब्धंचास्मैनिवेदयेत् हितंतस्याचरेन्नित्यंमनो
वाक्कायकर्मभिः २७ कृतज्ञाद्रोहिमेधाविशुचि
कल्यानसूयकाः अध्याप्याधर्मतःसाधुशक्ता
प्तज्ञानवित्तदाः २८ दंडाजिनोपवीतानिमेखलां
चैवधारयेत् ब्राह्मणेषुचरेद्भैक्षमनिंद्येष्वात्मवृत्त ३
ये २९ दिमध्यावसानेषुभवछब्दोपलक्षिताब्राह्म

णक्षत्रियविशांभैक्षचर्यायथाक्रमं ३० कृताग्नि
कार्योभुंजीतवाग्यतोगुर्वनुज्ञया आपोशानक्रियापू
र्वंसत्कृत्यान्नमकुत्सयन् ३१ ब्रह्मचर्येस्थितोनि
कमन्नमद्यादनापदि ब्राह्मणःकाममश्नीयाछ्राद्धे
व्रतमपीडयन् ३२ मधुमांसांजनोच्छिष्टशुक्तस्त्री
प्राणिहिंसनं भास्करालोकनाश्लीलपरिवादादि
वर्जयेत् ३३ सगुरुर्यः क्रियाः कृत्वावेदमस्मैप्र
यच्छति उपनीयददद्वेदमाचार्यसउदाहृतः ३४
एकदेशमुपाध्यायऋत्विग्यज्ञकृदुच्यते एतेमा

Indira Gandhi National
Centre for the Arts

न्यायथापूर्वमेभ्योमातागरीयसी ३५ प्रतिवेदंब्रह्म
चर्यंद्वादशाब्दानिपंचवाग्रहणांतिकमित्येकेके
४ शांतःश्चैवषोडशे ३६ आषोडशाद्द्वाविंशाच्चतु
र्विंशाच्चवत्सरात् ब्रह्मक्षत्रविशांकालऔपनाय
निकःपरः ३७ अतऊर्ध्वंपतंत्येतेसर्वधर्मबहिष्कृताः
सावित्रीपतिताव्रात्याव्रात्यस्तोमादृतेक्रतोः ३८ मातु
र्यदग्रेजायंतेद्वितीयंमौञ्जिबंधनात् ब्राह्मणःक्षत्रि ४
यविशस्तस्मादेतेद्विजाःस्मृताः ३९ यज्ञानांतप
सांचैवशुभानांचैवकर्मणां वेदएवद्विजातीनांनिः

श्रेयसकरःपरः ४० मधुनापयसाचैवसदेवांस्त
र्पयेद्द्विजः पितॄन्मधुघृताभ्यांचऋचोधीतेतुयोन्व
हं ४१ यजूंषिशक्तितोधीतेयोन्वहंसघृतामृतैः
प्रीणातिदेवानाज्येनमधुनाचपितॄंस्तथा ४२ सतु
सोमघृतैर्देवांस्तर्पयेद्योन्वहंपठेत् सामानितृप्तिंच
तथापितॄणांमधुसर्पिषा ४३ मेदसातर्पयेद्देवा
नथर्वांगिरसःपठन् पितॄंश्चमधुसर्पिर्भ्यामन्वहं
शक्तितोद्विजः ४४ वाकोवाक्यंपुराणंचनाराशं
सीश्चगाथिकाः इतिहासांस्तथाविद्यांयोधीतेश

Indira Gandhi National
Centre for the Arts

त्तितोन्वहं ४५ मांसक्षीरौदनमधुतर्पणं सदिवौक
सां करोतितृप्तिंचतथा पितृणांमधुसर्पिषा ४६
५ तेतृप्तास्तर्पयंत्येनंसर्वकामफलैःशुभैः यंयंक्रतुम
धीयीततस्यतस्याप्नुयात्फलं ४७ त्रिर्वित्तपूर्ण
पृथिवीदानस्यफलमश्नुते तपसश्चपरस्येहनित्
यंस्वाध्यायवान्द्विजः ४८ नैष्ठिकोब्रह्मचारी ५
चवसेदाचार्यसन्निधौ तदभावेस्यतनयेपत्न्यांवै
श्वानरेपिवा ४९ अनेनविधिनादेहंसाधयन्वि
जितेन्द्रियः ब्रह्मलोकमवाप्नोतिनचेहाजायते

पुनः ५० इतिब्रह्मचारिप्रकरणं गुरवेतुवरंदत्वास्ना
यीततदनुज्ञया वेदंव्रतानिवापारंनीत्वाह्युभयमे
ववा ५१ अविप्लुतब्रह्मचर्योलक्षण्यांस्त्रियमुद्वहे
त् अनन्यपूर्विकांकांतामसपिंडांयवीयसीं ५२ अ
रोगिणींभ्रातृमतीमसमानार्षगोत्रजां पंचमात्सप्तमा
दूर्ध्वंमातृतः पितृतस्तथा ५३ दशपूरुषविख्या
तात्श्रोत्रियाणांमहाकुलात् स्फीतादपिनसं
चारिरोगदोषसमन्वितात् ५४ एतैरेवगुणैर्यु
क्तः सवर्णश्रोत्रियोवरः यत्नात्परीक्षितः पुं

Indira Gandhi National
Centre for the Arts

स्त्वयुवाधीमान्जनप्रियः ५५ यदुच्यते द्विजातीनां शू
६ द्राद्दारोपसंग्रहः नैतन्मम मतं यस्मात्तत्रात्माजाय
ते स्वयं ५६ तिस्रो वर्णानुपूर्व्येण द्वे तथैका यथा
क्रमं ब्राह्मण क्षत्रिय विशां भार्या स्वा शूद्र जन्म
नः ५७ ब्राह्मो विवाह आहूय दीयते शक्त्यलंकृता
तज्जः पुनात्युभयतः पुरुषानेकविंशतिं ५८ ६
यज्ञस्थ ऋत्विजे दैव आदायार्षस्तु गोद्वयं चतुर्द
श प्रथमजः पुनात्युत्तरजश्च षट् ५९ इत्युक्त्वा
चरतां धर्मं सह या दीयतेर्थिने स कायः पावयेत्त

ज्जः षट् षड्वंश्यान्सहात्मना ६० आसुरो द्रविणादाना
द्गांधर्वः समयान्मिथः राक्षसो युद्धहरणात्पैशाचः क
न्यकाछलात् ६१ पाणिर्ग्राह्यः सवर्णासु गृह्णीयात्क्ष
त्रिया शरं वैश्या प्रतोदमादद्याद्वेदने त्वग्रजन्मनः ६२
पिता पितामहो भ्राता सकुल्यो जननी तथा कन्याप्रदः
पूर्वनाशे प्रकृतिस्थः परः परः ६३ अप्रयच्छन्समा
प्नोति भ्रूणहत्यामृतावृतौ गम्यं त्वभावे दातॄणां कन्या
कुर्यात्स्वयंवरं ६४ सकृत्प्रदीयते कन्या हरंस्तां चो
रदंडभाक् दत्तामपि हरेत्पूर्वाच्छ्रेयांश्चेद्वर आव्र

Indira Gandhi National
Centre for the Arts

जेत् ६५ अनाख्यायददद्दोषंदंडउत्तमसाहसं अक्षुणं
७ तुत्सृजन्दंडयोदूषयंस्तुमृषाशतं ६६ अक्षताचैवपु
नर्भूः संस्कृतापुनः स्वैरिणीयापतिंहित्वासवर्णंकाम
तः श्रयेत् ६७ अपुत्रांगुर्वनुज्ञातोदेवरः पुत्रकाम्यया
सपिंडोवासगोत्रोवाघृताभ्यक्तऋतावियात् ६८
आगर्भसंभवाद्गच्छेत्पतितस्त्वन्यथाभवेत् अनेन ७
विधिनाजातः क्षेत्रजः संभवेत्सुतः ६९ हृताधि
कारांमलिनांपिंडमात्रोपजीविनीं परिभूतामधः
शय्यांवासयेद्व्यभिचारिणीं ७० सोमः शौचंद

दौस्त्रीणांगंधर्वश्चशुभांगिरं पावकः सर्वमेध्यत्वंमे
ध्यावैयोषितोह्यतः ७१ व्यभिचाराद्दतौशुद्धिर्गर्भे
त्यागोविधीयते गर्भभर्तृवधादौचतथामहति
पातके ७२ सुरापीव्याधितधूर्तावंध्यार्थघ्न्यप्रि
यंवदा स्त्रीप्रसूश्चाधिवेत्तव्यापुरुषद्वेषिणीतथा
७३ अधिविन्नातुभर्तव्यामहदेनोन्यथाभवेत्
यत्रानुकूल्यंदंपत्योस्त्रिवर्गस्तत्रवर्द्धते ७४ मृता
जीवतिवायापत्यौयानान्यमुपगच्छति सेहकीर्तिमा
वाप्नोतिमोदतेचोमयासह ७५ आज्ञासंपादि

Indira Gandhi National
Centre for the Arts

नीरत्तांवीरसं प्रियवादिनीं त्यजन्दाप्यस्तीतीयांश्रा
८ मङ्ग्वोभरणंस्त्रियाः ७६ स्त्रीभिर्भर्त्तवचःकार्यमे
षधर्मःपरःस्त्रियाः आशुद्धेः संप्रतीक्ष्योहिमहा
पातकदूषितः ७७ लोकानंत्यंदिवंप्राप्तिः पुत्रपो
त्रप्रपौत्रकैः यस्मात्तस्मात्स्त्रियःसेव्याःकर्त्तव्या
श्चसुरक्षिताः ७८ षोडशर्तुर्निशास्त्रीणांतस्मि ८
न्युग्मासुसंविशेत् ब्रह्मचर्यैवपर्वाण्याद्याश्चतस्त्र
श्चवर्जयेत् ७९ एवंगच्छन्स्त्रियंक्षामांमघांमूलं
चवर्जयेत् सुस्थइंदौसकृत्पुत्रंलक्षण्यंजनयेत्

त्पुमान् ८० यथाकामीभवेद्वापिस्त्रीणांवरमनुस्म
रन् स्वदारनिरतश्चैवस्त्रियोरक्ष्यायतस्मृताः ८१
भर्तृभ्रातृपितृज्ञातिश्वश्रूश्वशुरदेवरैः बंधुभिश्च
स्त्रियःपूज्याभूषणाच्छादनाशनैः ८२ संयतो
पस्करादक्षाहृष्टाव्ययपराङ्मुखी कुर्याच्छ्वशुरयोः
पादवंदनंभर्तृतत्परा ८३ क्रीडांशरीरसंस्कारंस
माजोत्सवदर्शनं हास्यंपरगृहेयानंत्यजेत्प्रोषि
तभर्तृका ८४ रक्षेत्कन्यांपितावित्रांपतिःपुत्रास्तु
वार्द्धके अभावेज्ञातयस्तेषांस्वातंत्र्यंनक्वचि

Indira Gandhi National
Centre for the Arts

त्स्त्रियाः ८५ पितृमातृसुतभ्रातृश्वश्रूश्वशुरमातुलैः
९ हीनानस्याद्विनाभर्त्रागर्हणीयान्यथाभवेत् ८६
पतिप्रियहितेयुक्तास्वाचाराविजितेंद्रिया इहकी
र्तिमवाप्नोतिप्रेत्यचानुत्तमांगतिं ८७ सत्यामन्या
सवर्णायांधर्मकार्यंनकारयेत् सवर्णासुविधौ
धर्म्येज्येष्ठयानविनेतरा ८८ दाहइत्वाग्निहो
त्रेणस्त्रियंवृत्तवतींपतिः आहरेद्विधिवद्दारान ६
ग्नींश्चैवाविलंबयन् ८९ इतिविवाहप्रकरण
म् सवर्णेभ्यः सवर्णासुजायंतेहिसजातयः अ

निंद्येषुविवाहेषुपुत्राः संतानवर्द्धनाः ९० विप्रान्मू
र्द्धावसिक्तोहिक्षत्रियायांविशःस्त्रियां अंबष्ठः शू
द्र्यांनिषादोजातःपारशवोपिवा ९१ वैश्याशू
द्र्योस्तुराजन्यात् माहिष्योग्रौसुतौस्मृतौ वैश्या
त्तुकरणः शूद्र्यांविन्नास्वेषविधिःस्मृतः ९२
ब्राह्मण्यांक्षत्रियात्सूतोवैश्याद्वैदेहकस्तथा शू
द्राज्जातस्तुचांडालः सर्वधर्मबहिष्कृतः ९३
क्षत्रियामागधंवैश्याच्छूद्रात्क्षत्तारमेवच शू
द्रादायोगवंवैश्याजनयामाससेवसुतं ९४ मा

Indira Gandhi National
Centre for the Arts

हिष्येण कारिण्यां तु रथकारः प्रजायते असत्संत-
स्तु विज्ञेयाः प्रतिलोमानुलोमजाः ९५ जात्युत्क-
१० श्री र्षो युगे ज्ञेयः सप्तमे पंचमे पि वा व्यत्यये कर्मणां सा-
म्यं पूर्ववच्चाधरोत्तरं इति जातिविवेकप्रकरणं क-
र्म स्मार्त्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही दायकाला-
हृते वापि श्रौतं वैतानिकाग्निषु ९७ शरीरचिं-
तां निर्वर्त्य कृतशौचविधिर्द्विजः प्रातः संध्यामु- १०
पासीत दंतधावनपूर्विकां ९८ हुत्वाग्नीन् सूर्य-
दैवत्यान् जपेन्मंत्रान् समाहितः वेदार्थानधिगच्छे-

च्छास्त्राणि विविधानि च ९९ उपेयादीश्वरं चैव योग-
क्षेमार्थसिद्धये स्नात्वा देवान्पितॄंश्चैव तर्पयेदर्चये-
त्तथा १०० वेदाथर्वपुराणानि सेतिहासानि शक्ति-
तः जपयज्ञप्रसिद्ध्यर्थं विद्यां चाध्यात्मिकीं जपेत् १
वलिकर्मस्वधाहोमः स्वाध्यायातिथिसत्क्रिया भूत-
पित्र्यमरब्रह्ममनुष्याणां महामखाः २ देवेभ्यश्च
हुतादन्नाच्छेषाद्भूतवलिं हरेत् अन्नं भूमौ श्वचा-
ण्डालवायसेभ्यश्च विक्षिपेत् ३ अन्नं पितृमनुष्ये-
भ्यो देयमप्यन्वहं जलं स्वाध्यायं सततं कुर्यान्न प-

Indira Gandhi National
Centre for the Arts

चेदन्नमात्मने ४ बालस्ववासिनीवृद्धगर्भिण्यातुरका
११ न्यकाः संभोज्यातिथिभृत्यांश्च दंपत्योः शेषभोजनं ५
आपोशानेनोपरिष्टादधस्तादश्नता तथा अनग्नम
मृतं चैव कार्यमन्नं द्विजन्मना ६ अतिथिस्तु वर्णानां
देयं शक्त्यानुपूर्वशः अप्रणोद्योतिथिः सायमपि वा
कृ भक्तणोदकैः ७ सत्कृत्य भिक्षवे भिक्षा दातव्या सुव्र ११
ताय च भोजयेच्चागतान्काले सखिसंबंधिबांधवान्
८ महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेत् सत्क्रि
याचासनं स्वादु भोजनं सूनृतं वचः ९ प्रतिसंवत्सरं

त्वर्घ्याः स्नातकाचार्यपार्थिवाः प्रियो विवाह्यश्च तथाय
ज्ञं प्रत्यृत्विजः पुनः १० अध्वनीनोतिथिर्ज्ञेयः श्रोत्रि
यो वेदपारगः मान्यावेतौ गृहस्थस्य ब्रह्मलोकमभी
प्सतः ११ परपाकरुचिर्न स्यादनिंद्यामंत्रणादृते वाक्
पाणिपादचापल्यं वर्जयेच्चातिभोजनं १२ अतिथिं
श्रोत्रियं तृप्तमासीमांतमनुव्रजेत् अहः शेषं समा
सीत शिष्टैश्च बंधुभिः १३ उपास्य पश्चिमां संध्यां हु
त्वाग्नींस्तानुपास्य च भृत्यैः परिवृतो भुक्त्वा नातितृ
प्त्याथ संविशेत् १४ ब्राह्मे मुहूर्ते चोत्थाय चिंतयेदा

Indira Gandhi National
Centre for the Arts

त्मनोदितं धर्मार्थकामान्स्वकालेयथाशक्तिनहाप-
१२ येत् १५ विद्याकर्मवयोबंधुवित्तैर्मान्याययथाक्रमं
एतैः प्रभूतैः शूद्रोपिवार्द्धकेमानमर्हति १६ वृद्धभारि
नृपस्नातस्त्रीरोगिवरचक्रिणां पंथादेयोनृपस्तेषां
मान्यःस्नातश्चभूपतेः १७ इज्याध्ययनदानानिवैश्य १२
स्यक्षत्रियस्यच प्रतिग्रहोधिकोविप्रेयाजनाध्यापने-
तथा १८ प्रधानंक्षत्रियेकर्मप्रजानांपरिपालनं कुसीदकृ
षिवाणिज्यंपाशुपाल्यंविशःस्मृतं १९ शूद्रस्यद्विजशुश्रूषा
तयाजीवन्वणिग्भवेत् शिल्पैर्वाविविधैर्जीवेद्द्विजातिहितमाचरन् २०

भार्यारतिःशुचिर्भृत्यभर्ताश्राद्धक्रियारतः नमस्कारेणमं
त्रेणपंचयज्ञान्नहापयेत् २१ अहिंसासत्यमस्तेयंशौ-
चमिंद्रियनिग्रहः दानंदमोदयाक्षांतिः सर्वेषांधर्मसाध
नं २२ वयोबुद्ध्यर्थवाग्वेषश्रुताभिजनकर्मणां आ-
चरेत्सदृशींवृत्तिमजिह्मामशठांतथा २३ त्रैवार्षिका-
धिकान्नोयः सहिसोमंपिबेद्द्विजः प्राक्सौमिकीः क्रि
याःकुर्याद्यस्यान्नंवार्षिकंभवेत् २४ प्रतिसंवत्सरं
सोमःपशुःप्रत्ययनंतथा कर्तव्याग्रयणेष्टिश्चचातु-
र्मास्यानिचैवहि २५ एषामसंभवेकुर्यादिष्टिंवैश्वान

Indira Gandhi National
Centre for the Arts

रोद्विजः हीनकल्पंन्नकुर्वीतसतिद्रव्येफलप्रदं २६
१२ चांडालोजायतेयज्ञकरणाच्छूद्रभिक्षितात् यज्ञार्थ
लब्धमददद्भासःकाकोपिवाभवेत् २७ कुम्भलक्षं भी
धान्योवात्र्यहिकोःश्वस्तनोपिवा जीवेद्वापिशिलोंछेन
श्रेयानेषांपरःपरः २८ इतिगृहस्थप्रकरणं नस्वाध्या
यविरोध्यर्थमीहेतनयतस्ततः नविरुद्धप्रसंगेनसं
तोषीचभवेत्सदा २९ राजांतेवासियाज्येभ्यः सी १३
दंनिछेद्धनंक्षुधा दंभहेतुकपाखंडिबकवृत्तींश्च
वर्जयेत ३० शुक्लांबरधरोनीचकेशश्मश्रुनखः

शुचिः नभार्यादर्शनेश्नीयान्नैकवासानसंस्थितः ३१
नसंशयंप्रपद्येतनाकस्मादप्रियंवदेत् नाहितंनानृ
तंचैवनस्तेयस्यान्नवार्धुषी ३२ दाक्षायणीब्रह्मसू
त्रीवेणुमान्सकमंडलुः कुर्यात्प्रदक्षिणंदेवमृद्गो
विप्रवनस्पतीन् ३३ नतुमेहेन्नदीछायावर्त्मगोष्ठां
बुभस्मसु नप्रत्यग्न्यर्कगोसोमसंध्यांबुस्त्रीद्विजन्म
नः ३४ नेक्षेतार्कंननग्नांस्त्रींनचसंसृष्टमैथुनां नच
मूत्रंपुरीषंवाश्रुचीराहुतारकाः ३५ अयंमेवज्रइत्ये
वंसर्वंमंत्रमुदीरयेत् वर्षत्यप्रावृतोगच्छेत्स्वपेत्प्रत्यक्

Indira Gandhi National
Centre for the Arts

शिरानच ३६ ष्ठीवनासृक्शकृन्मूत्ररेतांस्यप्सुनानि
१४ क्षिपेत् पादौप्रतापयेन्नाग्नौनचैनमभिलंघयेत् ३७
जलंपिबेन्नांजलिनानशयानंप्रबोधयेत् नाक्षैःक्रीडे
न्नधर्मघ्नैर्व्याधितैर्वानसंवसेत् ३८ विरुद्धंवर्जयेत्क
र्मप्रेतधूमंनदीतरं किशाभस्मतुषांगारकपालेषुचसं
स्थितिं ३९ नाचक्षीतधयंतींगांनाद्वारेणविशेत्क्व १४
चित् नराज्ञःप्रतिगृह्णीयाल्लुब्धस्योच्छास्त्रवर्तिनः
४० प्रतिग्रहेसूनिचक्रिध्वजिवेश्यानराधिपाः
दुष्टादशगुणंपूर्वात्पूर्वादेतेयथाक्रमं ४१ अध्या

यानामुपाकर्मश्रावण्यांश्रवणेनवा हस्तेनौषधिभावे
वापंचम्यांश्रावणस्यतु ४२ पौषमासस्यरोहिण्याम
ष्टकायामथापिवा जलांतेछंदसांकुर्यादुत्सर्गंविधि
वद्बहिः ४३ त्र्यहंप्रेतेष्वनध्यायःशिष्यर्त्विग्गुरुबंधुषु रवा
उपाकर्मणिचोत्सर्गेस्वशाखाश्रोत्रियेतथा ४४ सं
ध्यागर्जितनिर्घातभूकंपोल्कानिपातने समाप्यवेदं
द्युनिशमारण्यकमधीत्यच ४५ पंचदश्यांचतुर्दश्या
मष्टम्यांराहुसूतके ऋतुसंधिषुभुक्त्वावाश्राद्धिकंप्र
तिगृह्यच ४६ पशुमंडूकनकुलश्वाहिमार्जारमूष

Indira Gandhi National
Centre for the Arts

केश्व कृतेंतरे चाहोरात्रं शाकपातेन पोच्छ्रये ४७ श्वा-
१५ क्रोष्टुगर्दभोलूक सामवाणार्तनिस्वने अमेध्यशव
शूद्रांत्यश्मशानपतितांतिके ४८ देशे शोच्ये चात्म-
नि च विद्युत्स्तनितसंप्लवे भुक्त्वार्द्रपाणिरंभोंतर्निशी-
थे ति मारुते ४९ पांशुप्रवर्षे दिग्दाहे संध्यानीहार
भीतिषु धावतः पूतिगंधे च शिष्टे च गृहमागते ५०
खरोष्ट्रयानहस्त्यश्वनौवृक्षेरिणारोहणे सप्तत्रिंश १५
दनध्यायानेतांस्तात्कालिकान्विदुः ५१ देवर्त्विक्
स्नातकाचार्यराज्ञां छायां परस्त्रियः नाक्रामेद्

क्तविण्मूत्रष्ठीवनोद्वर्तनानि च ५२ विप्राहिक्षत्रिया-
त्मानो नावज्ञेयाः कदाचन आमृत्योः श्रियमाकां-
क्षेन्न कंचिन्मर्मणि स्पृशेत् ५३ दूरादुच्छिष्टविण्मूत्र
पादांभांसि समुत्सृजेत् श्रुतिस्मृत्युदितं सम्यङ् नमा
चारमाचरेत् ५४ गोब्राह्मणानलान्नानि नोच्छिष्टेन प-
दा स्पृशेत् न निंदाताडने कुर्यात्सुतं शिष्यं च ताडये-
त् ५५ कर्मणा मनसा वाचा यत्नाद्धर्मं समाचरेत्
अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न तु ५६ मातृ-
पितृतिथिभ्रातृजामिसंबंधिमातुलैः वृद्धबालातु

Indira Gandhi National
Centre for the Arts

राचार्यवैद्यसंश्रितबांधवैः ५७ ऋत्विक्पुरोहिताप
२६ त्यभार्यादाससनाभिभिः विवादं वर्जयित्वा तु सर्वा
ल्लोकान्जयेद्गृही ५८ पंचपिंडाननुद्धृत्य न स्ना
यात्परवारिषु स्नायान्नदीदेवखातह्रदप्रस्रवणे
षु च ५९ परशय्यासनोद्यानगृहयानानि वर्जये
त् अदत्तान्यग्निहीनस्य नान्नमद्यादनापदि ६०
कदर्यबद्धचौराणां क्लीबरंगावतारिणां वैणाभिश १६
स्तवार्धुष्यगणिकागणदीक्षिणां ६१ चिकित्सका
तुरक्रुद्धपुंश्चलीमत्तविद्विषां क्रूरोग्रपतितव्रात्य

दांभिकोच्छिष्टभोजिनां ६२ अवीरास्त्रीस्वर्णकारस्त्री
जितग्रामयाजिनां शास्त्रविक्रयिकर्मारतंतुवायश्ववृत्ति
नां ६३ नृशंसराजरजककृतघ्नवधजीविनां चैल
धावसुराजीवसहोपपतिवेश्मनां ६४ पिशुनानृति
नोश्चैव तथा चाक्रिकबंदिनां एषामन्नं न भोक्तव्यं सोम
विक्रयिणस्तथा ६५ शूद्रेषु दासगोपालकुलमित्रा
र्द्धसीरिणः भोज्यान्ना नापितश्चैव यश्चात्मानं निवे
दयेत् ६६ इति स्नातकप्रकरणं अनर्चितं वृथामां
सं केशकीटसमन्वितं शुक्तं पर्युषितोच्छिष्टं श्वस्पृ

Indira Gandhi National
Centre for the Arts

ष्टंपतितेक्षितं ६७ उदक्यास्पृष्टसंघुष्टंपर्यायान्नंच
वर्जयेत् गोघ्रातंत्रा कुनोछिष्टंपदास्पृष्टं चकामतः
१९ ६८ अन्नंपर्युषितंभोज्यंस्नेहाक्तंचिरसंस्थितं
अस्नेहाअपिगोधूमयवगोरसविक्रियाः ६९ सं
धिन्यनिर्दशावत्सगोपयः परिवर्जयेत् औष्ट्रमेक
शफंस्त्रैणमारण्यकमथाविकं ७० देवमार्थहवि १२
मुलोहितान्वृश्चनांस्तथा अनुपाकृतमांसानि
विड्जानिकवकानिच ७१ क्रव्यादपक्षिणस्तु
हंसुकप्रतुदटिट्टिभान् सारसैकशफान्हंसान्से

वींश्चग्रामवासिनः ७२ कोयष्टिप्लवचक्राह्वबला
कावकविष्किरान् वृथाकृसरसंयावपायसापूप
शष्कुलीः ७३ कलविंकसकाकोलंकुररंरज्जुदा
लकं जालपादान्खंजरीटानज्ञातांश्चमृगद्विजा
न् ७४ चाषांश्चरक्तपादांश्चसौनंवल्लूरमेवच म
त्स्यांश्चकामतोजग्ध्वासोपवासस्त्र्यहंवसेत् ७५
पलांडुंविड्वराहंचछत्राकंग्रामकुक्कुटं लशुनंगृं
जनंचैवभुक्त्वाचांद्रायणंचरेत् ७६ भक्ष्याःपं
चनखाःसेधागोधाकच्छपशल्लकाः शशश्च

Indira Gandhi National
Centre for the Arts

त्स्येष्वपिहिसिंहतुंडकरोहिता: ७७ तथापाठीनरा
जीवशल्कांशकाश्चद्विजातिभि: अतश्चलध्वंमांसम्
१८ स्यविधिंभक्षणवर्जने ७८ प्राणात्ययेतथाश्रा
द्धेप्रोक्षितंद्विजकाम्यया देवान्पितॄन्समभ्यर्च्यखा
दन्मांसंनदोषभाक् ७९ वसेत्सनरकेघोरेदि
नानिपशुरोमभि: संमितानिदुराचारोयोहंत्यवि
धिनापशून् ८० सर्वान्कामानवाप्नोतिहयमे १८
धफलंतथा गृहेपिनिवसन्मर्त्योमुनिर्मांसस्य
वर्जनात् ८१ इतिभक्ष्याभक्ष्यप्रकरणम् सोव

२१|१०५

पूजयित्वामहीपति: ९० समूहकार्यप्रहितोय
ल्लभेततदर्पयेत् एकादशगुणंदाप्योयद्यसौना
र्पयेत्स्वयं ९१ धर्मज्ञा:शुचयोलुब्धाभवेयु:का
र्यचिंतका: कर्तव्यंवचनंतेषांसमूहहितवादि
नां ९२ श्रेणिनैगमपाषंडिगणानामप्ययंविधि:
भेदंचैषांनृपोरक्षेत्पूर्ववृत्तिंचपालयेत् इतिसंवि
द्व्यतिक्रमप्रकरणम् ९३ गृहीतवेतन:कर्मत्य
जन्द्विगुणमावहेत् अगृहीतेसमंदाप्योभृत्यैर

Indira Gandhi National
Centre for the Arts

हृतपस्कर: ९४ दाप्यस्तद्दशमं भागं वणिज्यपण्य
संस्थितः अनिश्चित्य भृतिं यस्तु कारयेत्स महीक्षि
६० ता ९५ देशं कालं च योतीयाल्लाभं कुर्याच्च यो
न्यथा तत्र स्यात्स्वामिनः छंदोऽधिकं देयं कृते
धिके ९६ यो यावत्कुरुते कर्म तावत्तस्य तु वे ६०
तनं उभयोरप्यसाध्यं चेत्कार्यं कुर्याद्यथाश्रुतं
९७ अराजदैविकं नष्टं भांडं दाप्यस्तु वाहकः प्र
स्थानविघ्नकृच्चैव प्रदाप्यो द्विगुणां भृतिं ९८ प्र

क्रांते सप्तमं भागं चतुर्थं पथि संत्यजेत् भृतिम
र्द्धपथे सर्वां प्रदाप्यस्त्याजकोपि च ९९ वेतना
दानप्रकरणं ग्लहे शतिकवृद्धेस्तु सभिकः पं
चकं शतं गृह्णीयाद्धूर्त्तकितवादितराद्दशकं श
तं १०० स सम्यक्पालितो दद्याद्राज्ञे भागं यथा
कृतं जितमुद्ग्राहयेज्जेत्रे दद्यात्सत्यं वचः क्षमी १
प्राप्ते नृपतिना भागे प्रसिद्धे धूर्त्तमंडले जितं ससा
भिके स्थाने दापयेदन्यथा न तु २ द्रष्टारो व्यवहारा

Indira Gandhi National Centre for the Arts

णांसाचिह्नश्चनत्वहि राज्ञासचिह्नंनिर्वास्याः कू
६१ टाक्षेपधिदेविनः ३ धृतमेकमुखंकार्यंतस्कर
ज्ञानकारणात् एषएवविधिर्ज्ञेयः प्राणिघूतेस
माह्वये ४ धृतप्रकरणम् सत्यासत्यान्यथा
स्तोत्रैर्न्यूनांगेंद्रियरोगिणां क्षेपंकरोतिचेद्दंड्यः
पणानर्द्धत्रयोदश ५ अभिगंतास्मभगिनींमातरं ६२
वातवेतिह शपंतंदापयेद्राजापंचविंशतिकंदं
मं ६ अर्द्धोधमेषुद्विगुणंपरस्त्रीषूत्तमेषुच दंड

प्रणयनंकार्यंवर्णजात्युत्तराधरैः ७ प्रातिलोम्याप
वादेषुद्विगुणत्रिगुणादमाः वर्णानामानुलोम्येन
तस्मादर्द्धार्द्धहानितः ८ बाहुग्रीवानेत्रसक्थिवि
नाशेवाचिकेदमः शत्यस्तदर्द्धिकःपादनासाकर्ण
करादिषु ९ अशक्तस्तुवदन्नेवंदंडनीयः पणान्
दश तथाशक्तःप्रतिभुवंदाप्यः क्षेमायतस्यतु
१० पतनीयकृतेक्षेपेदंडोमध्यमसाहसः मध्यमो
जातिपूगानांप्रथमोग्रामदेशयोः १२ इतिवाक्पारु

Indira Gandhi National
Centre for the Arts

ष्यप्रकरणं असाक्षिकहते चिह्नैर्युक्तिभिश्चागमेन च
द्रष्टव्यो व्यवहारस्तु कूटचिह्नकृतो भयात् १२ भस्म
१२ पंकरजःस्पर्शे दंडो दशपणः स्मृतः अमेध्यपार्ष्णि
निष्ठ्यूतस्पर्शने द्विगुणस्ततः १४ समेष्वेवं परस्त्री
षु द्विगुणस्तूत्तमेषु च हीनेष्वर्धदमो मोहमदादि १२
भिरदंडना १५ विप्रपीडाकरं छेद्यमंगमब्राह्म
णस्य तु उद्गूर्णे प्रथमो दंडः संस्पर्शे तु तदर्धिकः
१६ उद्गूर्णे हस्तपादे तु दशविंशतिकौ दमौ परस्प

रं सर्वेषां शस्त्रे मध्यमसाहसः १७ पादकेशां
शुककरोल्लुंचनेषु पणान्दश पीडाकर्षांशुका
वेष्टपादाध्यासे शतं दमः १८ शोणितेन विना दुः
खं कुर्वन्काष्ठादिभिर्नरः द्वात्रिंशतं पणान्दंड्यो
द्विगुणान्दर्शनेसृजः १९ करपाददतो भंगे छेद
ने कर्णनासयोः मध्यो दंडो व्रणोद्भेदे मृतकल्प
हते तथा २० चेष्टाभोजनवाग्रोधे नेत्रादिप्रति
भेदने कंधराबाहुसक्थ्नां च भंगे मध्यमसाहसः २१

Indira Gandhi National
Centre for the Arts

॥कं घ्नतां बह्नां तु यथोक्ताद्विगुणो दमः कल
हापहृतं देयं दंडस्तु द्विगुणस्ततः २२ दुःखमुत्पा
६३ दयेद्यस्तु स समुत्थानजं व्ययं दाप्यो दंडं च यो य
स्मिन् कलहे समुदाहृतः २३ अभिघाते तथा भे
दे छेदे कुड्यावपातने पणान्दाप्यः पंचदशविं ६३
शतिं तद्व्ययं तथा २४ दुःखोत्पादि गृहे द्रव्यं क्षि
पन्प्राणहरं तथा षोडशाद्यः पणान्दाप्यो द्वितीयो
मध्यमं दमं २५ दुःखे च शोणितोत्पादे शाखां

गच्छेदने तथा दंडः क्षुद्रपशूनां तु द्विपणप्रभृतिः क्रमा
त् २६ लिंगस्य छेदने मृत्यौ मध्यमो मूल्यमेव च म
हापशूनामेतेषु स्थानेषु द्विगुणो दमः २७ प्ररोहि
शाखिनां शाखास्कंधसर्वविदारणे उपजीव्यद्रु
माणां च विंशतेर्द्विगुणो दमः २८ चैत्यश्मशानसी
मासु पुण्यस्थाने सुरालये जातद्रुमाणां द्विगुणो
दमो वृक्षे च विश्रुते २९ गुल्मगुच्छक्षुपलताप्र
तानौषधिवीरुधां पूर्वस्मृतादर्धदंडः स्थानेषू

Indira Gandhi National
Centre for the Arts

तेषु कर्त्तने ३० दंडपारुष्यप्रकरणम् सामान्यद्रव्य
१४ प्रसभहरणात्साहसं स्मृतं तन्मूल्याद्विगुणो दंडो नि
ह्नवे तु चतुर्गुणः ३१ यः साहसं कारयति स दाप्यो द्विगु
णं दमं यश्चैवमुक्त्वाहं दाता कारयेत्स चतुर्गुणं ३२
अर्घ्याक्रोशातिक्रमकृद्भ्रातृभार्याप्रहारकः संदि १४
ष्टस्याप्रदाता च समुद्रगृहभेदकृत् ३३ सामंतकु
लिकादीनामपकारस्य कारकः पंचाशत्पणिको
दंडः एषामिति विनिश्चयः ३४ स्वच्छंदविधवागामी

विक्रुष्टेऽनभिधावकः अकारणे च विक्रोष्टा चंडा
लश्चोत्तमान् स्पृशन् ३५ शूद्रप्रव्रजितानां चैव दै
पित्र्ये च भोजकः अयुक्तशपथं कुर्वन्नयोग्यो यो
ग्यकर्मकृत् ३६ वृषक्षुद्रपशूनां च पुंस्त्वस्योप
घातकृत् साधारणस्यापलापी दासीगर्भवि
नाशकृत् ३७ पितापुत्रस्वसृभ्रातृदंपत्याचार्य
शिष्यकाः एषामपतितान्योन्यत्यागी च शतदंड
भाक् ३८ वसानस्त्रीन्पणान्दंड्यो नेजकस्तु प

Indira Gandhi National
Centre for the Arts

रांशुकं विक्रयां वक्रया धान्यपाचितेषु पणान्दश
३९ पितापुत्रविरोधे तु साक्षिणां द्विगुणो दमः अ
६५ न्तरे च तयोर्यस्यात्तस्याप्यष्टगुणो दमः ४० तुलाशा
सनमानानां कूटकृन्नाणकस्य च एभिश्च व्यवह
र्तायः स दाप्यो दम उत्तमं ४१ अकूटं कूटकं ब्रूते ६५
कूटं यश्चाप्यकूटकं स नाणकपरीक्षी तु दाप्य उत्त
मसाहसं ४२ भिषक् मिथ्याचरं दाप्यस्तिर्यक्षु प्रथ
मं दमं मानुषे मध्यमं राजमानुषेषूत्तथा ४३ अव

मंग

ध्यं यश्च वध्नाति वध्यं यश्च प्रमुंचति अप्राप्तं व्यवहारं
च स दाप्यो दम उत्तमं ॥४४॥ मानेन तुलया वापि यो
ऽंशमष्टममाहरेत् दंडं स दाप्यो द्विशतं वृद्धौ हानौ च
कल्पितं ४५ भेषजस्नेहलवणगंधधान्यगुडादिषु
पण्येषु प्रक्षिपन्हीनं पणान्दाप्यस्तु षोडश ४६ मृच्च
र्ममणिसूत्रायः काष्ठवल्कलवाससां अजातौ जा
तिकरणे विक्रेयाष्टगुणो दमः ४७ समुद्गपरिवर्तं
च सारभांडं च कृत्रिमं आधाने विक्रये वापि नयतो

Indira Gandhi National
Centre for the Arts

दंडकल्पना ४९ भिन्नेपणेतुपंचाशत्पणेतुशत
मुच्यते द्विपणोद्विशतोदंडोमूल्यवृद्धौतुवृद्धिमान्
११ ४० संभूयकुर्वतामर्घंसवाधंकारुशिल्पिनां
अर्घस्यंह्रासंवृद्धिंवाजानतोदमउत्तमः ५० संभूय
वणिजांपण्यमनर्घेणोपरुंधतां विक्रीणतांवा ११
विहितोदंडउत्तमसाहसः ५१ राजनिस्थाप्यतेयो
र्घःप्रत्यहंतेनविक्रयः क्रयोवानिस्रवस्तस्माद्वणिजां
लाभकृत्स्मृतः ५२ स्वदेशपण्येतुशतंवणिग्गृह्णीतपंचकं

दशकंपारदेश्येतुयःसद्यःक्रयविक्रयी ५३ पण्य
स्योपरिसंस्थाप्यव्ययंपण्यसमुद्भवं अर्घोनुग्रहकृ
त्कार्यःक्रेतुर्विक्रेतुरेवच ५४ गृहीतमूल्यंयःप
ण्यक्रेतुर्नैवप्रयच्छति सोदयंतस्यदाप्योसौदिग्ला
भंचदिगागते ५५ विक्रीतमपिविक्रेयंपूर्वक्रेत
र्यगृह्णति हानिश्चेक्रेतुदोषेणक्रेतुरेवहिसाभ
वेत् ५६ राजदैवोपघातेनपण्येदोषमुपागते
हानिर्विक्रेतुरेवासौयाचितस्याप्रयच्छतः ५७ अन्य

Indira Gandhi National
Centre for the Arts

हस्तेचविक्रीतंदुष्टंवादुष्टवद्यदि विक्रीणीतेदम
१७ स्तत्रमूल्यात्तद्विगुणोभवेत् ५८ क्षयंवृद्धिंचवणि
जांपण्यानामविजानतां क्रीत्वानानुशयःकार्यः
कुर्वन्षड्भागदंडभाक् ५९ समवायेनवणिजां
लाभार्थंकर्मकुर्वतं लाभालाभौयथाद्रव्यंयथा
वासंविदाकृतौ ६० प्रतिषिद्धमनादिष्टंप्रमा
दाद्यच्चनाशितं सतद्दद्याद्विप्लवाच्चरक्षिताद्द
शमांशभाक् ६१ अर्घप्रक्षेपणाद्विंशंभागंशुल्कंनृपो
हरेत् व्यासिद्धंराजयो

ग्यंचविक्रीतंराजगामितत् ६२ मिथ्यावदन्परीमा
णंशुल्कस्थानादपासरन् दाप्यस्त्वष्टगुणंयश्चस
व्याजक्रयविक्रयी ६३ तरिकस्थलजंशुल्कंगृह्ण
न्दाप्यपणान्दश ब्राह्मणःप्रातिवेश्यानामेतदेवा
निमंत्रणे ६४ देशांतरगतेप्रेतेद्रव्यंदायादबांध
वाः ज्ञातयोवाहरेयुस्तदागतास्तैर्विनानृपः ६५
जिह्मंत्यजेयुर्निर्लाभमशक्तोन्येनकारयेत् अ
नेनविधिनाख्यातऋत्विक्कर्षककर्मिणां ६६

Indira Gandhi National
Centre for the Arts

ग्राहकैर्गृह्यतेचौरोलोप्त्रेणाथपदेनवापूर्वकर्मा
६८ पराधीवतथाचाशुद्धवासकः ६७ अन्येपिशं
कयाग्राह्याजातिनामादिनिह्नवैः द्यूतस्त्रीपा
नसक्ताश्चशुष्कभिन्नमुखस्वराः ६८ परद्रव्य
गृहाणांचपृच्छकागूढचारिणः निरायाव्ययवं ६८
तश्चविनष्टद्रव्यविक्रयः ६९ गृहीतःशंकयाचौ
र्येनात्मानंचेद्विशोधयेत् दापयित्वाहृतंद्रव्यंचौ
रदंडेनदंडयेत् ७० चौरंप्रदाप्यापहृतंघातयेद्वि

विधैर्वधैः सचिह्नंब्राह्मणंकृत्वास्वराष्ट्राद्विप्र
वासयेत् ७१ घातितेपहृतेदोषोग्रामभर्तुरनिर्ग
तके विवीतभर्तुस्तुपथिचौरोद्धर्तुरवीतके
७२ स्वसीम्निदद्याद्ग्रामस्तुपदंवायत्रगच्छति
पंचग्रामीबहिःक्रोशाद्दशग्रामीथवापुनः ७३ बंदि
ग्राहांस्तथावाजिकुंजराणांचहारिणः प्रसह्यघा
तिनश्चैवशूलानारोपयेन्नरान् ७४ उत्क्षेपक
ग्रंथिभेदौकरसंदंशहीनकौ कार्यौद्वितीया

Indira Gandhi National
Centre for the Arts

पराधेकरपादौदेवहीनकौ ७५ क्षुद्रमध्यमहा-
द्रव्यहरणेसारतोदमः देशंकालंवयःशक्तिं
संचिंत्यंदंडकर्मणि ७६ भक्तावकाशाग्न्यु
दकमंत्रोपकरणव्ययान् दत्वाचौरस्यहंतुर्वा
जानतोदमउत्तमः ७७ शस्त्रावपातेगर्भस्य
पातनेचोत्तमोदमः उत्तमोवाधमोवापिपु
रुषस्त्रीप्रमापणे ७८ विप्रदुष्टांस्त्रियंचैवपु
रुषघ्नीमगर्भिणीम् सेतुभेदकरींचाप्सु

शिलांबध्वाप्रवेशयेत् ७९ विषाग्निदांपा-
तिगुरुनिजापत्यप्रमापणीं विकर्णकरना
सोष्ठीं कृत्वागोभिःप्रमापयेत् ८० अविज्ञा-
तहतस्याशुकलहंसुतबांधवाः प्रष्टव्यायो
षितश्चास्यपरपुंसिरताः पृथक् ८१ स्त्रीद्र
व्यवृत्तिकामोवाकेनवायंगतः सह मृत्युदेश
समासन्नंपृछेत्तांश्चापिजनैःशनैः ८२ क्षेत्रवे-
श्मवनग्रामविवीतखलदाहकाः राजप

Indira Gandhi National
Centre for the Arts

ल्पत्निगामी च दंड्यः स्यात्कटाग्निना ८३ इतिस्त्री
येप्रकरणम् पुमान्संग्रहणे ग्राह्यः केशाकेशि परस्त्रि
७० याः सद्यो वा कामजैश्चिह्नैः प्रतिपत्तौ द्वयोस्तथा ८४
नीवीस्तनप्रावरणसक्थिकेशावमर्शनं अदेशका
लसंभाषं सहैकस्थानमेव च ८५ स्त्रीनिषेधे शतं द
द्याद्द्विशतं तु दमं पुमान् प्रतिषेधे तयोर्दंडो यथा संग्र ७०
हणे तथा ८६ स्वजातावुत्तमो दंडो आनुलोम्ये
तु मध्यमः प्रातिलोम्ये वधः पुंसो नार्याः कर्णादिक

र्तनं ८७ अलंकृतां हरन्कन्यामुत्तमं त्वन्यथाधमं दं
डं दद्यात्सवर्णासु प्रातिलोम्ये वधः स्मृतः ८८ सका
मास्वनुलोमासु न दोषस्त्वन्यथाधमः दूषणे तु करछे
द उत्तमायां वधः स्मृतः ८९ शतं स्त्रीदूषणे दद्यात्
द्वे तु मिथ्याभिशंसने पशून्गच्छन्शतं दाप्यो हीन
स्त्रीगां च मध्यमं ९० अवरुद्धासु दासीषु भुजिष्या
सु तथैव च गम्यास्वपि पुमान्दाप्यः पञ्चाशत्पणि
कं दमं ९१ प्रसह्य दास्यभिगमे दंडो दशपणः स्मृतः

Indira Gandhi National
Centre for the Arts

वहूनां यच कोमासो चतुर्विंशतिकस्मृतः ९२ अ
७१ योनौ गच्छतो योषां पुरुषंचापि मेहतः चतुर्विंशति
को दंडस्तथा प्रव्रजितागमे ९३ अंत्याभिगम
ने वंक्यः कवंधेन प्रवासयेत् शूद्रस्तथांत्य
वस्यादंत्यस्यार्यागमे वधः ९४ इति स्त्रीसंग्र ७१
हे प्रकरणं ऊनं वाप्यधिकं वापि लिखेद्यो
राजशासनं पारदारिक चौरं वा मुंचतो दंड उत्त
मः ९५ अभक्ष्येण द्विजं दूष्यं दंड उत्तमसाहसं

मध्यमं क्षत्रियं वैश्यं प्रथमे शूद्रमर्धिकं ९६ कूटस्व
र्णव्यवहारी विमांसस्य च विक्रयी अंगहीनस्तु कु
र्तव्यो दाप्यश्चोत्तमसाहसं ९७ चतुष्पादकृतो दो
षो नापैहीति प्रजल्पतः काष्ठलोष्टेषुपाषाणबाहुयु
ग्यकृतस्तथा ९८ छिन्ननस्येन यानेन तथा भ
ग्नयुगादिना पश्चाच्चैवापसरता हिंसने स्वाम्यदो
षः नाक ९९ शक्तोप्यमोक्षयन्स्वामी दंष्ट्रिणां शृंगि
णां तथा प्रथमं साहसं दद्याद्विक्रुष्टे द्विगुणं तथा १००

Indira Gandhi National
Centre for the Arts

जारं चोरस्त्वभिवदं दाप्यः पंचशतानि दम उपजीव्य धनं मु
७२ चन्तरेवाष्टगुणीकृतं १ राज्ञोनिष्टप्रवक्तारं तस्यै
वाक्रोशकारिणं तन्मंत्रस्य प्रभेत्तारं छित्वाजिह्वां
प्रवासयेत् २ मृतांगलग्नविक्रेतुर्गुरोस्ताडयितुस्त
था राजयानासनारोढुर्दंड उत्तमसाहसः ३ द्विने
त्र नेदिनो राजद्विष्टादेशकृतस्तथा विप्रत्वेन तु शू ७२
द्रस्य जीवतोष्टशतोदमः ४ दुर्दृष्टांस्तु पुनर्दृष्ट्वा
व्यवहारान्नृपेण तु सभ्याः सजयिनो दंड्या विवा

दाद्विगुणं दमं ५ योमन्येताजितोस्मीति न्यायेनापि
पराजितः तमायांतं पुनर्जित्वा दापयेद्द्विगुणं दमं ६
राज्ञान्यायेन यो दंडो गृहीतो वरुणाय तं निवेद्य द
द्याद्विप्रेभ्यः स्वयं त्रिंशद्गुणीकृतं ७ राजभिः कृत
दंडास्तु कृत्वा पापानि मानवाः निर्मलाः स्वर्गमा
यांति संतः सुकृतिनो यथा ८ एवमुद्धृतदंडानां वि
शुद्धिः पापकर्मिणां स्वधर्मस्थापयन्राजा प्रजाभ्यो ध
र्ममश्नुते ९ यत्र दंडविधिर्नोक्तः सर्वैरेवमहात्मभिः

Indira Gandhi National
Centre for the Arts

हेत्राकालारिसंचित्यात्वदंडोविधीयते ३०० १० इति
७३ श्रीयाज्ञवल्कीयेधर्मशास्त्रेव्यवहाराध्यायोद्वितीयः
समाप्तः.. ऊनद्विवर्षंनिखनेन्नकुर्यादुदकंततः आ
श्मशानादनुव्रज्यइतरोज्ञातिभिर्वृतः १ यमसूक्तं
तथागाथांजपद्भिर्लौकिकाग्निना सदग्धव्यउपे
श्चेदाहिताग्न्यावृतार्थवत् २ सप्तमाद्दशमाद्वापि ७३
ज्ञातयोभ्युपयंत्यपः अपनःशोशुचदघमनेनपितृ
दिङ्मुखाः ३ एवंमातामहाचार्यप्रेतानामुदकक्रि

या कामोदकंसखिप्रत्तास्वस्रीयश्वशुरर्त्विजां ४ स
कृत्प्रसिंचंत्युदकंनामगोत्रेणवाग्यताः नब्रह्मचा
रिणःकुर्युरुदकंपतितास्तथा ५ पाषंड्यनाश्रिताः
स्तेनाभर्तृघ्न्यःकामगादिकाः सुराप्यात्मत्यागि
न्योनाशौचोदकभाजनाः ६ कृतोदकान्समुत्ती
र्णान्मृदुशाड्वलसंस्थितान् स्नातानभिवदेयु
स्तानितिहासैःपुरातनैः ७ मानुष्येकदलीस्तंभनिः
सारेसारमार्गणं यःकरोतिससंमूढोजलबुद्बुदसं

Indira Gandhi National
Centre for the Arts

निभे ८ पंचधासिभक्तः कायोयदिपंचत्वमागतः कर्म
७४ भिस्त्वशारीरोत्पेस्तत्रकापरिदेवना। ९ गंत्रीवसु
मतीनाशामुदधिर्दैवतानिच फेनप्रख्यः कथंन्ना
शंमर्त्यलोकोनयास्पति १० श्लेष्माश्रुबांधवैर्मुक्तं
प्रेतोभुंक्तेयतोवशः अतोनरोदितव्यंहि क्रियाः ७४
कार्याः स्वशक्तितः ११ इतिसंचित्यगच्छेयुः गृहं
बालपुरः सराः विदश्यनिंबपत्राणि नियतावा
ग्विवेश्मनः १२ चम्पाग्न्यादिसलिलंगोमयंगौरसर्ष
श्रा।

---

पान्प्रविशेयुः समालभ्यकृत्वाश्मनिपदंशनैः १३ प्र
वेशनादिकंकर्मप्रेतसंस्पर्शिनामपि इच्छतांतत्क्ष
णात्शुद्धिः परेषांप्राणसंयमात् १४ आचार्यपितृ
पाध्यायान्निर्हृत्यापिव्रती सकटान्नंचनाश्नीया
न्नचतैः सहसंवसेत् १५ क्रीतलब्धाशनाभूमौस्व
पेयुस्तेपृथक्पृथक्क्षितौ पिंडयज्ञावृतादेयंप्रेतायान्नं
दिनत्रयं १६ जलमेकाहमाकाशेस्थाप्यंक्षीरंच
मृन्मये वैतानोपासनाः कार्याः क्रियाश्चश्रुतिचो

Indira Gandhi National
Centre for the Arts

दनात् १७ त्रिरात्रं दशरात्रं वास्नातमात्रेणेच मिष्यतेऽक
७५ नष्टवर्षउभयोः सूतकं मातुरेवहि १८ पित्रोस्तु सूतकं
मातुस्तं दस्त्रदर्शनाद्ध्रुवं तदहन्ने प्रदुष्येत पूर्वेषां जन्म
कारणात् १९ अंतराजन्ममरणे शेषाहोभिर्विशुद्ध्य
ति गर्भस्रावे मासतुल्या निशाः शुद्धेस्तु कारणं २०
हतानां नृपगोविप्रैरन्वक्षं चात्मघातिनां प्रोषिते ७५
कालशेषस्यात्पूर्णे दत्त्वोदकं शुचिः २१ क्षत्रस्य द्वा
दशाहानि विशः पंचदशैव तु त्रिंशद्दिनानि शूद्र

स्य तदर्धं न्यायवर्तिनः २२ आदंतजननात्सद्य आचू
डान्नैशिकी स्मृता त्रिरात्रमाव्रतादेशाद्दशरात्रम
तः परं २३ अहस्त्वदत्तकन्यासु वालेषु च विशोध
नं गुर्वंतेवास्यनूचानमातुलश्रोत्रियेषु च २४ अ
नौरसेषु पुत्रेषु भार्यास्वन्यगतासु च निवासराज
नि प्रेते तदहः शुद्धकारणं २५ ब्राह्मणेनानुगंतव्
यो न शूद्रो न द्विजः क्वचित् अनुगम्याम्भसि स्नात्वा
स्पृष्ट्वाग्निं घृतभुक् शुचिः २६ महीपतीनां नाशौ

Indira Gandhi National
Centre for the Arts

चंहत्वा नां विद्युतातथा गोब्राह्मणार्थे संग्रामेयस्य
१६ चेछ्तिपार्थिवः २७ अविजारी तत्ता नां चयत्तिपं
कर्मकुर्वतां सत्रिव्रतिब्रह्मचारिणा न ब्रह्मविदांत
था २८ दानेविवाहेयज्ञेचसंग्रामेदेशविप्लवे
आपद्यपिचकष्टायांसद्यः शौचंविधीयते २९
उदक्याशुचिभिः स्नायात्संस्पृष्टस्तैरुपस्पृशे १६
त् अब्लिंगानिजपेच्चैवगायत्रीमनसासकृत्
३० कालोग्निःकर्ममृद्वायुर्मनोज्ञानंतपोजलं प

श्चात्तापोनिराहारः सर्वमीशुद्धिहेतवः ३१ अका
र्यकारिणांदानंवेगोनद्याश्चशुद्धिकृत् शोध्यस्य
मृच्चतोयंचसंन्यासोपद्विजन्मनां ३२ तपोवेदवि
दांक्षांतिर्विदुषांवर्ष्मणोजलं जपः प्रच्छन्नपापानां
मनसः सत्यमुच्यते ३३ भूतात्मनस्तपोविद्येबुद्धे
र्ज्ञानंविशोधनं क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिःपर
मामता ३४ इत्याशौचप्रकरणम् श्रोत्रेणकर्म
णाजीवेद्विशाबाप्यापदिद्विजः निस्तीर्यतामथा

Indira Gandhi National
Centre for the Arts

त्मानंपावयित्वान्यसेत्पथि ३५ फलोपलक्षौमसो
११ ममनुष्यापूपवीरुधः तिलौदनरसक्षारान्दधिक्षी
रंजलंघृतं ३६ शस्त्रासवमधूछिष्टंमधुलाक्षाच
वर्हिषः मृच्चर्मपुष्पकुतपकेशतक्रविशक्षितीः
३७ कौशेयनीलालवणमांसैकशफसीसकान् ११
शाकार्द्रौषधिपिण्याकपशुगंधांस्तथैवच ३८
वैश्यवृत्त्यापिजीवन्नोविक्रीणीतकदाचन धर्मा
र्थंविक्रयंनेयास्तिलाधान्येनतत्समाः ३९ ला

क्षालवणमांसानिपतनीयानिविक्रये पयोदधित
मद्यंहीनवर्णकराणितु ४० आपद्गतःसंप्रगृह्ण
न्भुंजानोपियतस्ततः नलिप्येतैनसाविप्रोज्वलना
र्कसमोहिसः ४१ कृषिःशिल्पंभृतिर्विद्याकुसीदं
शकटंगिरिः सेवानूपंनृपोभैक्षमापत्तौजीवना
नितु ४२ बुभुक्षितस्त्र्यहंस्थित्वाधान्यमब्राह्मणा
द्धरेत् प्रतिगृह्यतदाख्येयमभियुक्तेनधर्मतः ४३
तस्यवृत्तंकुलंशीलंश्रुतमध्ययनंतपः ज्ञात्वाराजा

Indira Gandhi National
Centre for the Arts

कुटुंबं च धर्म्यं वृत्तिं प्रकल्पयेत् ४४ इत्यापद्धर्मप्रक
७८ रणम् सुतविन्यस्तपत्नीकस्तया वानुगतो वनं वा
नप्रस्थो ब्रह्मचारी साग्निः सोपासनो व्रजेत् ४५
अफालकृष्टेनाग्नींश्च पितॄन्देवातिथीनपि भृत्यां
श्च तर्पयेत्स्मश्रुजटालोमभृदात्मवान् ४६ अ
ह्नो मासस्य षण्मां वा तथा संवत्सरस्य वा अर्थस्य ७८
संचयं कुर्यात्कृतमाश्वयुजे त्यजेत् ४७ दांतस्त्रि
षवणस्नायी निवृत्तश्च प्रतिग्रहात् स्वाध्यायवान्दा

नशीलः सर्वसत्वहिते रतः ४८ दंतोलूखलिकः का
लपक्वाशी वाश्मकुट्टकः श्रौतं स्मार्तं फलस्नेहैः
कर्म कुर्यात्तु नान्यथा ४९ चांद्रायणैर्नयेत्कालं
कृच्छ्रैर्वा वर्त्तयेत्तथा पक्षे गते वाप्यश्नीयान्मासे वा
हनि वा गते ५० स्वप्याद्भूमौ शुची रात्रौ दिवा संप्रप
दैर्नयेत् स्थानासनविहारैर्वा योगाभ्यासेन वा पु
नः ५१ ग्रीष्मे पंचाग्निमध्यस्थो वर्षासु स्थंडिलेश
यः आर्द्रवासास्तु हेमंते शक्त्या वापि तपश्चरेत् ५२

Indira Gandhi National
Centre for the Arts

यःकंटकैर्वितुदतिचंदनैर्यश्चलिंपति अक्रुद्धोपरि
१९ तुष्टश्चसमस्तस्यचतस्यच ५३ अग्नीनप्यात्मसा
त्कृत्वावृक्षावासोमिताशनः वानप्रस्थगृहेष्वे
वयात्रार्थंभैक्षमाचरेत् ५४ ग्रामादाहृत्यवाग्रासा
नष्टौभुंजीतवाग्यतः वायुभक्षः प्रागुदीचींगच्छेद्वा १९
वर्ष्मसंक्षयात् ५५ इतिवानप्रस्थप्रकरणम् व
नाद्गृहाद्वाकृत्वेष्टिंसार्ववेदसदक्षिणां प्राजाप
त्यांतदंतेतानग्नीनारोप्यचात्मनि ५६ अधीत

वेदोजपकृत्पुत्रवानन्नदोग्निमान् शक्त्याचयज्ञ
कृन्मोक्षेमनः कुर्यात्तुनान्यथा ५७ सर्वभूतहित
शांतस्त्रिदंडीसकमंडलुः एकारामः परिव्रज्यभि
क्षार्थग्राममाश्रयेत् ५८ अप्रमत्तश्चरेद्भैक्ष्यंसाया
ह्नेनाभिलक्षितः रहितेभिक्षुकैर्ग्रामेयात्रामात्रम
लोलुपः ५९ यतिपात्राणिमृद्वेणुदार्वलाबुमया
निच सलिलैःशुद्धिरेतेषांगोवालैश्चावघर्षणं
६० सन्निरुध्येंद्रियग्रामंरागद्वेषौप्रहायच भयंचह

Indira Gandhi National
Centre for the Arts

त्वांभक्तानामभक्तीभवतिद्विजः ६१ कर्त्तव्यास्त्राय
९० श्शुद्धिश्चापिहृत्केणविशेषतः ज्ञानोत्पत्तिनिमित्त
त्वात्स्वातंत्र्यकरणायच ६२ अवेत्तागर्नेवासाश्चक
र्मजागतयस्तथा आधपोव्याधपंक्तेराजराल्पावि
पर्षदः ६३ नवोजातिसहस्रेषुप्रियाप्रियावि ८०
पर्ययतोध्यानयोगेनसंपश्यत्सूक्ष्मआत्मात्मनि
स्थितः ६४ नाश्रमःकारणंधर्मेक्रियमाणोभवेद्धि
सः अतोयदात्मनोपथ्यंपरेषांनतदाचरेत् ६५

Indira Gandhi National
Centre for the Arts